# निखिलेश्वरानंद स्तुति

ॐ नमस्ते सते सर्व लोकाश्रयाय, नमस्ते चिते विश्व-रुपात्मकाय।
नमोऽद्वैत तत्त्वाय मुक्ति प्रदाय, नमो ब्रह्मणे व्यापिने निर्गुणाय॥

त्वमेकं शरण्यं त्वमेकं वरेण्यं, त्वमेकं जगत्- कारणं विश्व-रूपम्।
त्वमेकं जगत् कर्तृ - पातृ- प्रहतृ , त्वमेकं परं निश्चलं निर्विकल्पम्॥

भयानां भयं भीषणं भीषणानाम्, गतिः प्राणिनां पावनं पावनानाम्।
महोच्चैः पदानां नियन्तुः त्वमेकं, परेषां परं रक्षकं रक्षकाणाम्॥

परेशं प्रभो! सर्व-रुपाविनाशिन्, अनिर्देश्य सर्वेन्द्रियागम्य सत्य।
अचिन्त्याक्षर व्यापकाव्यक्त-तत्त्व जगद्- भासकाधीश पायादपायात्॥

एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥

नमस्ते-नमस्ते विभो! विश्वमूर्ते! नमस्ते-नमस्ते चिदानन्दमूर्ते।
नमस्ते-नमस्ते तपो योगगम्यः नमस्ते-नमस्ते श्रुतिज्ञानगम्यः॥

तदेकं स्मरामस्तदेकं जपामः तदेकं जगत्-साक्षि-रूपं नमानः।
तदेकं निधानं निरालम्बरूपं भवाम्बोधि पोतं शरण्यं व्रजामः॥

यं ब्रह्मा वरूणेन्द्ररुद्र-मारुतः स्तुन्वन्ति दिव्यैः स्तवैः।
वेदैः साङ्गपदक्रमोपनिषदैः गायन्ति यं सामगाः॥

ध्यानावस्थिताद्-गतेन मनसा पश्यन्ति यं योगिनो।
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः॥

**जय गुरु देव**